# प्रश्न–पत्र की योजना 2023–24

कक्षा – 10th
विषय – संस्कृत (तृतीय भाषा)

**समय : 3 घंटे 15 मिनट** **अंक : 80**

1. उद्देश्य हेतु अंकभार –

| क्र.सं. | उद्देश्य | अंकभार | प्रतिशत |
|---|---|---|---|
| 1. | ज्ञान | 15 | 18-75% |
| 2. | अवबोध | 33 | 41-25% |
| 3. | अभिव्यक्ति | 21 | 26-25% |
| 4. | मौलिकता | 11 | 13-75% |
| **योग** | | **80** | **100%** |

2. प्रश्नों के प्रकारवार अंकभार –

| क्र. सं. | प्रश्नों का प्रकार | प्रश्नों की संख्या | कुल अंक | कुल अंक प्रतिशत | प्रतिशत प्रश्नों का | संभावित समय |
|---|---|---|---|---|---|---|
| 1. | वस्तुनिष्ठ | 1/15 | 15 | 18-75 | 05-00 | 20 |
| 2 | रिक्तस्थान | 1/7 | 07 | 08-75 | 05-00 | 20 |
| 2. | अतिलघूत्तरात्मक | 1/10 | 10 | 12-5 | 05-00 | 40 |
| 3. | लघूत्तरात्मक | 10 / 10 | 21 | 26-25 | 50-00 | 30 |
| 4. | दीर्घउत्तरीय प्रश्न | 4 / 4 | 15 | 18-75 | 20-00 | 35 |
| 5. | निबंधात्मक | 3 / 4 | 12 | 15-00 | 15-00 | 50 |
| | **योग** | **20 / 49** | **80** | **100** | **100** | **195** |

3. विषय वस्तु का अंकभार –

| क्र.सं. | विषय वस्तु | अंकभार | प्रतिशत |
|---|---|---|---|
| 1 | अपठितावबोधनम् | 8 | 10 |
| 2 | रचनात्मकं कार्यम् | 15 | 20 |
| 3 | अनुपयुक्तंव्याकरणम् | 25 | 30 |
| 4 | पठितावबोधनम् | 32 | 40 |

# प्रश्न–पत्र ब्ल्यू प्रिन्ट

कक्षा–10वीं | विषय : संस्कृत (तृतीय भाषा) | पूर्णांक – 80

| क्र. सं. | उद्देश्य इकाई / उप इकाई | ज्ञान | | | | | | अवबोध | | | | | | ज्ञानोपयोग / अभिव्यक्ति | | | | | | कौशल / मौलिकता | | | | | | योग |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | वस्तुनिष्ठ | रिक्तस्थान | अति.लघु | लघूत्तरात्मक | दीर्घउत्तरीय | निबन्धात्मक | वस्तुष्ठि | रिक्तस्थान | अति.लघु | लघूत्तरात्मक उत्तरात्मक | दीर्घउत्तरीय | निबन्धात्मक | वस्तुष्ठि | रिक्तस्थान | अति.लघु | लघूत्तरात्मक | दीर्घउत्तरीय | निबन्धात्मक | वस्तुष्ठि | रिक्तस्थान | अति.लघु | लघूत्तरात्मक | दीर्घउत्तरीय | निबन्धात्मक | |
| 1 | अपठितावबोधनम् | | | | | | | | | 8(1) | | | | | | | | | | | | | | | | 8{1} |
| 2 | रचनात्मकं कार्यम् | | | | | | | | | | | 4(1) | | | | | | 8(2) | | | | | | 3(1) | | 15(4) |
| 3 | अनुपयुक्तंव्याकरणम् | | 7(1) | 2(-) | | | | 9(1) | | | 4(2) | | | | | | 3(1) | | | | | | | | | 25(5) |
| 4 | पठितावबोधनम् | 6(-) | | | | | | | | | 8(4) | | | | | | 6(3) | | 4(1) | | | | | | 8(2) | 32(10) |
| 5 | | | | | | | | | | | | | | | | | | | | | | | | | | |
| 6 | योग | 6(-) | 7(1) | 2(-) | | | | 9(1) | | 8(1) | 12(6) | 4(1) | | | | | 9(4) | 8(2) | 4(1) | | | | | 3(1) | 8(2) | 80(20) |
| 7 | | 15(1) | | | | | | 33(9) | | | | | | 21(7) | | | | | | 11(3) | | | | | | |

विकल्पों की योजना :– ख्ण्ड स , द में आंतरिक विकल्प है।

नोटः– कोष्ठक में बाहर की संख्या अंकों की तथा भीतर प्रश्नों की द्योतक है।

# माध्यमिक परीक्षा, 2024
# Secondary Examination, 2024
## नमूना प्रश्न–पत्र
## Model Paper
## कक्षा – 10वीं
## Class - 10th
## विषय – संस्कृत
## Sub : Sanskrit

समय : 03 घण्टे 15 मिनट | पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः–**

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांकः अनिवार्यतो लेख्यः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेख्यानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेख्यानि।
5. सर्वेषां प्रश्नानामुत्तराणि संस्कृतमाध्यमेनैव लेखनीयानि।

## खण्डः – "अ"

1. वस्तुनिष्ठप्रश्नाः–

(i) पाषाणीसभ्यता समाविष्टा न स्यात्– 1

(अ) प्रकृत्याम् (ब) निसर्गे (स) नगरे (द) वने

(ii) 'बुद्धिर्बलवती सदा' कथा कुतः संगृहीता? 1

(अ) शुकसप्ततितः (ब) बृहत्कथातः (स) पंचतन्त्रतः (द) धर्मतन्त्रतः

(iii) ' शिशुपालनम्' इत्यस्य पाठस्य रचयिता कः? 1

(अ) श्रीहर्षः (ब) कालिदासः (स) भारविः (द) दिङ्नागः

(iv) मनुष्यः किं कृत्वा नावसीदति? 1

(अ) उद्यमम् (ब) आलस्यम् (स) धैर्यम् (द) पराक्रमम्

(v) सिंहस्य पुच्छं कः धुनोति? 1

(अ) काकः (ब) मयूरः (स) वानरः (द) शृगालः

(vi) प्रथमो धर्मः कः? 1

(अ) आचारः (ब) विचारः (स) विनयः (द) दीनः

(vii) निष्कपटः इत्यस्य पदस्य सन्धिविच्छेदोऽस्ति– 1

(अ) निष्+ कपटः (ब) निश् + कपटः (स) निस् + कपटः (द) निर् + कपटः

(viii) प्रकृतिः + एव इत्यस्य सन्धिपदमस्ति– 1

(अ) प्रकृतिरेव (ब) प्रकृतिरव (स) प्रकृतिसेव (द) प्रकृत्येव

(ix) श्चुत्वसन्धेः उदाहरणमस्ति– 1

(अ) पेष्टा (ब) सच्चित् (स) जगदीशः (द) मनोहरः

(x) अनुस्वारसन्धेः उदाहरणमस्ति— 1

(अ) सत्कारः (ब) नमोनमः (स) धर्मं चर (द) फलमस्ति

(xi) ''अनुरथम्'' इत्यस्य पदस्य समासविग्रहः अस्ति— 1

(अ) रथस्य पश्चात् (ब) रथेन पश्चात् (स) रथे अनु (द) रथाय पश्चात्

(xii) द्विगुसमासस्य उदाहरणमस्ति— 1

(अ) रामश्यामौ (ब) पीताम्बरः (स) पंचपात्रम् (द) उपवनम्

(xiii) ''मुखकमलम्'' इत्यत्र कः समासः? 1

(अ) अव्ययीभावः (ब) कर्मधारयः (स) द्वन्द्वः (द) बहुव्रीहिः

(xiv) ''आचारः'' इत्यत्र पदे कः उपसर्गः? 1

(अ) आङ् (ब) अव (स) अप् (द) अधि

(xv) ''दुर्वहम्'' इत्यत्र उपसर्गं शब्दं च पृथक् कृत्वा लिखत— 1

(अ) दुस् + वहम् (ब) दुर् + वहम् (स) दु + वहम् (द) दु + र्वहम्

**2. निर्देशानुसारं रिक्तस्थानानि पूरयत—**

(i) सा................मधुरं फलं खादति। ( बालक + टाप् ) 1

(ii) तत्र ................ अस्ति। ( जन + तल् ) 1

(iii) शिशुः ................ पतति। ( धाव् + शतृ ) 1

(iv) एतत् .................गृहमस्ति। ( अस्मद्—शब्दस्य षष्ठीविभक्ति—एकवचनम् ) 1

(v) ...............नमः। ( हरि—शब्दस्य चतुर्थी—विभक्ति—एकवचनम् ) 1

(vi) श्वः अहं पत्रं.......................। ( लिख्धातु—लृट्लकारः ) 1

(vii) ते जनाः धनं ...................। ( दाधातु—लट्लकारः ) 1

**3. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत— 8**

(अ) भारते सर्वत्र विविधता अस्ति। विवधतायामपि एकतायाः सुमधुरा धारा प्रवहति। वयं सर्वे एकं राष्ट्रध्वजं नमामः, एकं च राष्ट्रगानं गायामः। भारतस्य प्रदेशानां सर्वसंस्काराणां जननी एका संस्कृतभाषा एवास्ति। प्रायः जनाः उत्सवेषु धार्मिककार्येषु च संस्कृतभाषायां समानरूपेण मन्त्रोच्चारणं कुर्वन्ति। भारतस्य सर्वासां भाषाणां जननी संस्कृतभाषा एवास्ति। अत्र न कोऽपि सन्देहः। भारतीयसंस्कृतिः संस्कृते निहिता अस्ति। अस्माकं भारतीयसंस्कृतेः मूलमन्त्रः सर्वजनहिताय सर्वजनसुखाय च अस्ति।

अतिलघूत्तरात्मकप्रश्नाः–

(क) एकपदेन उत्तरत। ½ X 4 =2

(i) भारते सर्वत्र का अस्ति ?
(ii) मन्त्रोच्चारणं कस्यां भाषायां जनाः कुर्वन्ति?
(iii) वयम् एकं किं गायामः?
(iv) भारतीयसंस्कृतिः कुत्र निहिता अस्ति?

(ख) पूर्णवाक्येन उत्तरत।

(i) भारतीयसंस्कृतेः मूलमन्त्रः कः? 1
(ii) भारतस्य सर्वासां भाषाणां जननी का अस्ति? 1

(iii) भारते कस्याः सुमधुरा धारा प्रवहति। 1

(ग) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। 1

(घ) भाषिककार्यम् ½ X 4 =2

(i) ''वयं सर्वे राष्ट्रध्वजं नमामः'' इत्यत्र कर्तृपदं लिखत।
(ii) ''सुमधुरा धारा प्रवहति'' इत्यत्र विशेषणपदं किम्?
(iii) 'माता' इत्यस्य पर्यायपदं गद्यांशात् चित्वा लिखत।
(iv) प्रायः जनाः......................। अत्र 'जनाः' इत्यस्य क्रियापदं लिखत।

(ब) अधोलिखतौ संख्यावाचिशब्दौ संस्कृते लिखत। 1+1=2

(i) 125
(ii) 328

**खण्डः – 'ब'**

4. बालकः <u>कलमेन</u> पत्रं लिखति। रेखाकिंतपदे विभक्तिं तत्कारणं च लिखत। 2

5. पित्रेण सह पुत्रः नगरम् अगच्छत्। वाक्यं संशोधयत। 2

6. 'अपि कुशलं <u>महाराजस्य।</u> रेखाकिंतपदे प्रश्ननिर्माणं कुरुत। 2

7. एकस्मिन् <u>चत्वरे</u> स्थापितवन्तौ। रेखाकिंतपदे प्रश्ननिर्माणं कुरुत। 2

8. अधोलिखितश्लोकस्य हिन्दीभाषायां सप्रसंगं भावार्थं लिखत। 2

अवक्रता यथाचित्ते तथा वाचि भवेद् यदि।

तदेवाहुः महात्मनः समत्वमिति तथ्यतः।।

9. अधोलिखितश्लोकस्य अन्वयं मंजूषातः पदानि चित्वा पूरयत। 2

विचित्रे खलु संसारे नास्ति किंचिन्निरर्थकम्।

अश्वश्चेद् धावने वीरः भारस्य वहने खरः।।

अन्वयः – विचित्रे (i) ----------- किंचित्. (ii) ..............नास्ति। खलु चेत् अश्वः

(iii) .................वीरः (अस्ति, तर्हि) (iv) ..........भारस्य वहने (वीरः)।

| धावने, संसारे, खरः, निरर्थकम् |
|---|

10. स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत यद् अस्मिन् प्रश्नपत्रे न स्यात्। 2

11. विचित्रः साक्षी' इति पाठसारं हिन्दीभाषायां लिखत। 2

12. पर्यायपदं मेलयत। ½ X 4 =2

| | (क) | (ख) |
|---|---|---|
| (i) | सलिलम् | पुत्री |
| (ii) | वनम् | जलम् |
| (iii) | सुता | दन्तैः |
| (iv) | दशनैः | काननम् |

13. मंजूषायाः प्रदत्तैः समुचितैः अव्ययपदैः वाक्यानि पूरयत। 1+1+1

| सदा, अपि, एव, श्वः |
|---|

(i) अहं ............................जयपुरं गमिष्यामि।

(ii) रमेषः ................मया सह गमिष्यति।

(iii) त्वम् अत्र..............तिष्ठ।

## खण्डः – 'स'

14. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।

न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुवन्ति आश्चार्यमघटत्। स शवः प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान्– मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि त्वयाऽहं चोरितायाः मंजूषायाः ग्रहणाद् वारितः, अतः निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे । न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।

(क) एकपदेन उत्तरं लिखत। ½X2=1

(i) केन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ?
(ii) कः प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान्?

(ख) पूर्णवाक्येन उत्तरं लिखत। 1X2=2

(i) शवः न्यायाधीशमभिवाद्य किं निवेदितवान्?
(ii) आरक्षिणि निजपक्षं प्रस्तुवन्ति किम् अघटत्?

(ग) यथानिर्देशम् उत्तरं लिखत। ½X2=1

(i) तं जनं ससम्मानं मुक्तवान्। इत्यत्र सर्वनामपदं लिखत।
(ii) अतः निजकृत्यस्य फलं भुङ्क्ष्व। इत्यत्र क्रियापदं लिखत।

**अथवा**

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुदन् अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे अपतत्। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारं यत्नमकरोत्। तथापि वृषः नोत्थितः।

(क) एकपदेन उत्तरं लिखत। ½X2=1

(i) कृषकः किं कुर्वन्नासीत्?
(ii) तथापि कः नोत्थितः ?

(ख) पूर्णवाक्येन उत्तरं लिखत। 1X2=2

(i) कृषकः कं वृषभं तोदनेन नुदन् अवर्तत ?
(ii) कः तमुत्थापयितुं बहुवारं यत्नमकरोत ्?

(ग) यथानिर्देशम् उत्तरं लिखत। ½X2=1

(i) "क्रुद्धः कृषीवलः" इत्यत्र विशेषणपदं किम्?
(ii) दुर्बलः जवेन गन्तुमशक्तश्चासीत्। इत्यत्र क्रियापदं किम्?

15. अधोलिखितं श्लोकं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।

एक एव खगो मानी वने वसति चातकः।

पिपासितो वा म्रियते याचते वा पुरन्दरम्।

(क) एकपदेन उत्तरं लिखत। ½x2=1

(i) कः पिपासितो वा म्रियते ?

(ii) कुत्र चातकः वसति?

(ख) पूर्णवाक्येन उत्तरं लिखत। 1+1

(i) खगः कं याचते ?

(ii) कीदृशः खगः म्रियते?

(ग) यथानिर्देशम् उत्तरं लिखत। ½X2=1

(i) खगो मानी इत्यत्र विशेषणपदं लिखत।

(ii) वने वसति चातकः। इत्यत्र वाक्ये कर्तृपदं किम्?

**अथवा**

अमन्त्रमक्षरं नास्ति नास्तिमूलमनौषधम्।

अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः।।

(क) एकपदेन उत्तरं लिखत। ½x2=1

(i) अमन्त्रं किम् नास्ति ?

(ii) नास्तिमूलं किम् ?

(ख) पूर्णवाक्येन उत्तरं लिखत। 1+1

(i) कीदृषः पुरुषः नास्ति ?

(ii) तत्र कः दुर्लभः ?

(ग) यथानिर्देशम् उत्तरं लिखत। ½X2=1

(i) ''अमन्त्रमक्षरम्''इत्यत्र विषेष्यपदं किम्?

(ii) ''पुरुषः नास्ति'' इत्यत्र क्रियापदं लिखत।

16. अधोलिखितं नाट्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।

सिंहः– भोः ! अहं वनराजः, किं भयं न जायते? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा ?

एकः वानरः– यतः त्वं वनराजः भवितुं न सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्वरक्षायामपि समर्थः नासि, तर्हि कथमस्मान् रक्षिष्यसि?

(क) एकपदेन उत्तरं लिखत। ½x2=1

(i) कः वनराजः भवितुं न सर्वथाऽयोग्यः?
(ii) सर्वे मिलित्वा कं तुदन्ति?

(ख) पूर्णवाक्येन उत्तरं लिखत। 1+1

(i) राजा कीदृशः भवति ?
(ii) सिंहः कुत्र समर्थः नास्ति?

(ग) यथानिर्देशम् उत्तरं लिखत। ½x2=1

(i) ''अस्मान् रक्षिष्यसि'' इत्यस्य वाक्यस्य क्रियापदं लिखत।
(ii) ''भवान् तु भक्षकः'' इत्यत्र विशेषणपदं किम्?

अथवा

कुशः – अहमपि कुश इत्यात्मानं श्रावयामि।

रामः– अहो! उदात्तरम्यः समुदाचारः। किं नामधेयो भवतोर्गुरुः?

लवः – ननु भगवान् वाल्मीकिः।

रामः – केन सम्बन्धेन?

लवः – उपनयनोपदेशेन।

रामः– अहमत्र भवतोः जनकं नामतो वेदितुमिच्छामि।

लवः – न हि जानाम्यस्य नामधेयम्।

(क) एकपदेन उत्तरं लिखत। ½x2=1

(i) कीदृशः समुदाचारः?
(ii) अस्य किं न जानामि ?

(ख) पूर्णवाक्येन उत्तरं लिखत। 1+1

(i) किं नामधेयो भवतोर्गुरुः?

(ii) रामः किं नामतो वेदितुमिच्छति ?

(ग) यथानिर्देशम् उत्तरं लिखत। ½x2=1

(i) नामतो वेदितुमिच्छामि। इत्यत्र क्रियापदं लिखत।

(ii) उदात्तरम्यः समुदाचारः। इत्यत्र विशेष्यपदं किम्?

17. अधोलिखितानि वाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखत। 3

(i) तदा तस्य मुखस्था रोटिका अपि जले पतति।

(ii) एकदा कष्चित् कुक्कुरः एकां रोटिकां प्राप्नोत्।

(iii) तदा सः नदीजले स्वप्रतिबिम्बम् अपष्यत्।

(iv) सः कुक्करः रोटिकां प्राप्तुं तेन सह युद्धार्थं मुखम् उद्घाटयति।

(v) सः रोटिकां मुखे गृहीत्वा गच्छन् आसीत्।

(vi) स्वप्रतिबिम्बम् अन्यं कुक्कुरं मत्वा सः तस्य रोटिकां प्राप्तुम् अचिन्तयत्।

**अथवा**

मंजूषायां प्रदत्तषब्दानां सहायतया 'स्वच्छतायाः महत्त्वम्'' इति विषये षट्–संस्कृतवाक्येषु एकम् अनुच्छेदं लिखत।

| |
|---|
| समाजे, सर्वत्र, प्रसन्नता, कर्त्तव्यम्, मनसि, जीवने |

## खण्ड – ''द''

18. भवान् राजकीय आदर्श उच्च माध्यमिक विद्यालयस्य दशम्याः कक्षायाः छात्रः रमेशः अस्ति। स्वकीयं प्रधानाचार्यं प्रति दिनत्रयस्य अवकाशार्थम् एकं प्रार्थना पत्र लिखत। 4

**अथवा**

भवान् दीपकः अस्ति। परीक्षापरिणामस्य विषये स्वपितरं प्रति लिखिते अस्मिन् पत्रे मञ्जूषायाः उचितपदानि चित्वा रिक्तस्थानानि पूरयतु।

(नमोनमः, प्रतिशतं, अधिकम्, नवनवतिः, अहम्, भवान् अभ्यासेन, परिणामः)


गाँधीविद्यामन्दिरतः
बिकानेरम्

पूज्य पितृमहोदय !
(i)..................................
अतीव हर्षस्य विषयोऽस्ति यत् मम अर्द्धवार्षिक्याः परीक्षायाः (ii).................................. आगतः। अहं नवतिः (iii).................................. अङ्कान् प्राप्तवान्। किन्तु इदं ज्ञात्वा (iv).......................... ........ अपि चिन्तितः भविष्यति यत् गणितविषये (v).................................. सुष्ठु अङ्कान् प्राप्तुं समर्थः न अभवम्।अद्य आरभ्य अहम् (vi).................................. अभ्यासं करिष्यामि। आशासे यत् (vii).................................. भवतः आशीर्वादेन च आगामिवार्षिक–परीक्षायाम् अपि(viii).......... ........................ प्रतिशतं अङ्कान् प्राप्स्यामि। मातरम्–अग्रजम् प्रति अपि मम चरणस्पर्शः कथनीयः।

भवतः पुत्रः
दीपकः

19. अधः प्रदत्तचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन अष्ट वाक्यानि वाटिकायाः शोभाविषये लिखत– 8x½= 4

(वाटिका, वृक्षे, सायंकालः, बालकः, फलानि, प्रातः, उत्पतन्ति,खगाः,अधः, शोभा, वानरः)



Scanned with OKEN Scanner

### अथवा

मञ्जूषातः उपयुक्तपदानि गृहीत्वा मातापुत्रयोः मध्ये वार्तालापं पूरयतु।

(वस्तूनि, आपणं, सायंकाले, विद्यालयस्य, गत्वा, मातुलः, भोजनं, त्वं)

**माता**– राघव! ..........................किं करोषि ?

**राघवः**– अहं मम ..........................गृहकार्यं करोमि।

**माता**– पुत्र! गृहकार्यानन्तरम् ........................ गत्वा ततः दुग्धं शाकफलानि च आनय।

**राघवः**– अहं .................. पुस्तकं क्रेतुम् आपणं गमिष्यामि् तदा दुग्धं शाकफलानि च आनेष्यामि।

**माता**– सांयकाले न त्वं तु पूर्वमेव ....................आनय।

**राघवः**– शीघ्रं किमर्थम् ?

**माता**– अद्य तव .......................... आगमिष्यति, अतः ..........................समयात् पूर्वमेव पक्ष्यामि।

**राघवः**– मातुलः आगमिष्यति चेत् अहम् इदानीम् एव गत्वा ...................क्रीत्वा आगच्छामि्।

20. अधोलिखितेषु वाक्येषु केषांचित् चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं कुरुत। 4

(i) विद्यालय के पास गाँव है।

(ii) नगर के चारों ओर वृक्ष हैं।

(iii) सुरेश अन्धेरे से डरता है।

(iv) हिमालय से गंगा निकलती है।

(v) हम दोनों विद्यालय जाते हैं।

(vi) जल के बिना जीवन सम्भव नहीं है।